I J C R M

International Journal of Contemporary Research In Multidisciplinary

Review Article

अभिज्ञानशाकुन्तलंनाटके श्लोकचतुष्टयस्य वैशिष्ट्यम्

अजय कुमार पधानः

शोधच्छात्रः, साहित्यविभागः, राष्ट्रियसंस्कृतविश्वविद्यालयः (NSU), तिरुपतिः, आन्ध्रप्रदेशः, भारतम्।

Corresponding Author: * अजय कुमार पधानः

DOI: https://doi.org/10.5281/zenodo.20843944

शोधसारांशः

अभिज्ञानशाकुन्तलम् नाटकमित्यस्य चतुर्थाङ्के प्रसिद्ध श्लोकचतुष्टयम् शकुन्तलायाः पितृगृहात् पतिगृह् प्रति गमनसमये महर्षेः कण्वस्य उपदेशरुपेण प्रस्तुतमस्ति।एते, श्लोकेषु गृहस्तजीवनस्य आदर्शाः , कुलमर्यादा,पतिव्रताधर्मः,विनयः,सेवा,समानता,प्रेम,सौहार्दादि निरुपितानि सन्ति।

Manuscript Information

- **ISSN No:** 2583-7397
- **Received:** 15-05-2026
- **Accepted:** 21-06-2026
- **Published:** 25-06-2026
- **IJCRM:**5(3); 2026: 1146-1148
- **©2026, All Rights Reserved**
- **Plagiarism Checked:** Yes
- **Peer Review Process:** Yes

How to Cite this Article

अजय कुमार पधानः. अभिज्ञानशाकुन्तलंनाटके श्लोकचतुष्टयस्य वैशिष्ट्यम्. Int J Contemp Res Multidiscip. 2026;5(3):1146-1148.

Access this Article Online

www.multiarticlesjournal.com

कुटशब्दाः कालिदास, कृतित्वम्, महाकाव्यम्, नाटकानि, खण्डकाव्यम् , अङ्कानां सामान्यपरिचयः।

© 2026 अजय कुमार पधानः. This is an open-access article distributed under the terms of the Creative Commons Attribution 4.0 International License (CC BY NC ND).https://creativecommons.org/licenses/by/4.0/

महाकविकालिदासस्य परिचयः

महाकविः कालिदासः संस्कृतसाहित्यस्य सर्वोत्तमः कविः नाटककारश्च आसीत्। सः "कविकुलगुरुः" इति प्रसिद्धः। तस्य जन्मस्थानं जन्मकालश्च निश्चितरूपेण न ज्ञायते। बहवः विद्वांसः मन्यन्ते यत् सः उज्जयिन्यां निवसति स्म तथा विक्रमादित्यस्य सभायां नवरत्नेषु अन्यतमः आसीत्। कालिदासस्य काव्येषु प्रकृतिवर्णनम्, प्रेम, धर्मः, नीति, मानवीयभावाः च अत्यन्तं मनोहरतया दृश्यन्ते। तस्य भाषा सरला, मधुरा, प्रसादगुणयुक्ता च अस्ति। उपमा-अलंकारस्य प्रयोगे सः अतिशयेन प्रवीणः आसीत्। अतः "उपमा कालिदासस्य" इति प्रसिद्धिः अस्ति।

कालिदासस्य कृतित्वम् -

महाकविना कालिदासेन सप्त महानि ग्रन्थानि विरचितानि। तेषु त्रीणि नाटकानि, द्वे महाकाव्ये, द्वे खण्डकाव्ये च सन्ति।

नाटकानि -

१. अभिज्ञानशाकुन्तलम्

२. विक्रमोर्वशीयम्

३. मालविकाग्निमित्रम्।

महाकाव्यम् -

१. रघुवंशम्

२. कुमारसम्भवम्।

खण्डकाव्यम् -

१. मेघदूतम्

२. ऋतुसंहारः।

अभिज्ञानशाकुन्तलं कालिदासस्य सर्वश्रेष्ठं नाटकम् अस्ति। अस्मिन् दुष्यन्तशकुन्तलयोः प्रेमकथा सुन्दररूपेण वर्णिता अस्ति। रघुवंशे रघुवंशीयराज्ञां चरितं वर्णितम्। कुमारसम्भवे शिवपार्वत्योः विवाहः तथा कुमारस्य जन्म वर्णितः। मेघदूते यक्षः मेघं दूतं कृत्वा स्वप्रियायै सन्देशं प्रेषयति। ऋतुसंहारे षण्णां ऋतूनां रमणीयं वर्णनम् अस्ति। महाकविः कालिदासः भारतीयसंस्कृतेः गौरवः अस्ति। तस्य रचनाः अद्यापि सम्पूर्णविश्वे आदरपूर्वकं पठ्यन्ते। तस्य साहित्यं संस्कृतसाहित्यस्य अमूल्यं धनम् अस्ति। अतः कालिदासः सर्वेषां कवीनां मध्ये श्रेष्ठः इति ।

अभिज्ञानशाकुन्तलस्य सामान्यपरिचयः -

अभिज्ञायते अनेन इति अभिज्ञानम्,शकुन्तलायाः इदं शाकुन्तलम् अभिज्ञानशाकुन्तलम् । महाकवेः कालिदासस्य प्रसिद्धं नाटकमस्ति। एतत् संस्कृतसाहितस्य सर्वश्रेष्ठेषु नाटकेषु अन्यतममस्ति। अस्मिन् नाटके सप्त अङ्काः सन्ति। अस्य प्रधानः रसः शृङ्गाररसः अस्ति, अस्य नाटकस्य नायकः राजा दुष्यन्तः अस्ति। नायिका शकुन्तला अस्ति। सा महर्षेः कण्वस्य आश्रमे वर्धिता पालितपुत्री आसीत्। एकदा राजा दुष्यन्तः मृगयानिमित्तम् अरण्यं गच्छति। कण्वाश्रमे तत्र सः शकुन्तलां पश्यति। उभयोः परस्परं प्रेम जायते। ततः तौ गान्धर्वविधिना विवाहं कुरुतः। गमनसमये राजा शकुन्तलायै स्वीयाम् अङ्गुलीयकं स्मृतिचिह्नरूपेण ददाति।राजा स्वनगरं प्रतिगच्छति। तस्मिन् समये दुर्वासा ऋषिः आश्रमम् आगच्छति। प्रेमवशात् शकुन्तला तस्य सत्कारं न करोति। अतः दुर्वासा क्रुद्धः भूत्वा शापं ददाति यत् –

विचिन्तयन्ती यमनन्यमनसा
तपोनिधिं वेत्सि न मामुपस्थितम् ।
स्मरिष्यति त्वां न सा बोधितोऽपि सन्

कथां प्रमत्तः प्रथमं कृतमिव ॥ (4-1)

"यं त्वं चिन्तयसि, स त्वां न स्मरिष्यति।" पश्चात् सः शापशमनम् अपि करोति - "अभिज्ञानदर्शनेन सः पुनः स्मरिष्यति।" शकुन्तला गर्भवती सती राजगृहं गच्छति। मार्गे अङ्गुलीयकं नदीमध्ये पतति। राज्ञः समीपे गत्वापि राजा तां न प्रत्यभिजानाति। सा दुःखिता भवति। अन्ते दैवीशक्त्या सा मरीचिमुनेः आश्रमं नीयते। अनन्तरं एकः मत्स्यजीवी मत्स्यस्य उदरात् अङ्गुलीयकं प्राप्नोति। तत् राज्ञे प्रदत्ते दुष्यन्तस्य स्मृतिः पुनः आगच्छति। सः स्वकृतदोषाय शोचति। अन्ते सः मरीच्याश्रमे शकुन्तलां पुत्रं भरतं च पश्यति। उभयोः पुनर्मिलनं भवति। राजा पुत्रं गृह्णाति, सर्वे सुखिनः भवन्ति। एवम् अस्य नाटकस्य सुखान्तः भवति।

अङ्कानां सामान्यपरिचयः -

प्रथमाङ्कः(आश्रमप्रवेशाङ्कः) - राजा दुष्यन्तः मृगयानिमित्तम् आश्रमम् आगच्छति। तत्र शकुन्तलां दृष्ट्वा तस्याः प्रति प्रेम उत्पद्यते।

द्वितीयाङ्कः(आश्रमनिवेशाङ्कः) - राजा विदूषकेन सह शकुन्तलायाः चिन्तां करोति। तस्य प्रेम अधिकं दृढं भवति।

तृतीयाङ्कः(मिलनाङ्कः) - दुष्यन्तशकुन्तलयोः परस्परं प्रेम प्रकटते। उभौ गान्धर्वविवाहं कुरुतः। राजा अङ्गुलीयकं शकुन्तलायै ददाति।

चतुर्थाङ्कः(विदाइअङ्कः) - दुर्वासा ऋषिः आगच्छति। शकुन्तला ध्यानवशात् तस्य सत्कारं न करोति। ऋषिः शापं ददाति। ततः कण्वऋषेः आज्ञया शकुन्तला राजगृहं प्रेष्यते।

पञ्चमाङ्कः(प्रत्याख्यानाङ्कः) - मार्गे अङ्गुलीयकं नद्यां पतति। राजसभायां राजा शकुन्तलां न प्रत्यभिजानाति। सा अत्यन्तं दुःखिता भवति। अन्ते सा दैवीशक्त्या नीयते।

षष्ठाङ्कः(पश्चातापाङ्कः) - मत्स्यस्य उदरात् अङ्गुलीयकं लभ्यते। तत् दृष्ट्वा राज्ञः स्मृतिः पुनरागच्छति। सः पश्चात्तापं करोति।

सप्तमाङ्कः(पुनर्मेलनाङ्कः) - राजा मरीचिमुनेः आश्रमं गच्छति। तत्र शकुन्तलां पुत्रं भरतं च पश्यति। उभयोः पुनर्मिलनं भवति। परिवारः पुनः एकत्र भवति। नाटकस्य सुखान्तः भवति।

अभिज्ञानशाकुन्तलं संस्कृतसाहितस्य अमूल्यं रत्नम् अस्ति। अस्मिन् प्रेम, धर्मः, प्रकृति सौन्दर्यम्, ऋषिसंस्कृतिः, आदर्शजीवनम्, क्षमा, कर्तव्यपालनं च सुन्दररीत्या वर्णितम्। अतः एतत् नाटकं सर्वेषां पाठकानां मनांसि आकर्षयति।

तत्र श्लोकचतुष्टयम् -

काव्येषु नाटकं रम्यं तत्र रम्या शकुन्तला।
तत्रापि च चतुर्थोऽङ्कस्तत्र श्लोकचतुष्टयम्॥

इति श्लोकाधारेण अभिज्ञानशाकुन्तलं नाटके चतुर्थाङ्के श्लोकचतुष्टयं सामाजिकदृष्ट्या सुप्रसिद्धाः भवन्ति।

यास्यत्यद्य शकुन्तलेति हृदयं संस्पृष्टमुत्कण्ठया,
कण्ठः स्तम्भितबाष्पवृत्तिकलुषश्चिन्ताजडं दर्शनम्।
वैक्लव्यं मम तावदीदृशमिदं स्नेहादरण्यौकसः,

पीड्यन्ते गृहिणः कथं नु तनयाविश्लेषदुःखैर्नवैः(4 – 8)

अयं श्लोकः महर्षेः कण्वस्य हृदयस्थितां पुत्री-वियोगजनितां वेदनां वर्णयति। अद्य शकुन्तला स्व पतिगृहं गमिष्यति इति चिन्तया तस्य(कण्वमुनेः) हृदयं दुःखमनुभवति। तस्य अश्रुभिः अवरुद्धः कारणात् कण्ठः वाष्परुद्धः भवति । चिन्तया तस्य मनः तथा नेत्रादि इन्द्रिय अपि जडवत्व अनुभवति। सः कण्वमुनिः कथयति अहं वनवासी मुनिः सन् अपि स्नेहात् एतादृशं दुःखस्तितिः अनुभवामि चेत्, तर्हि ये गृहे सन्ति ये गृहस्थाः भवन्ति, ते स्वपुत्र्री वियोगसमये कथं दुःखमनुभवन्ति? इति चिन्तयित्वा वहु दुःखं अनुभवामि। पुत्री-वियोगः सर्वेषां पितृणां कृते अत्यन्तं दुःखदायकः भवति। स्नेहः सर्वेषां हृदये समानः भवति। पुनः तत्र –

पातुं न प्रथमं व्यवस्यति जलं युष्मास्वपीतेषु या
नादत्ते प्रियमण्डनापि भवतां स्नेहेन या पल्लवम्।
आद्ये वः कुसुमप्रसूतिसमये यस्या भवत्युत्सवः

सेयं याति शकुन्तला पतिगृहं सर्वैरनुज्ञायताम् (4 – 11)

श्लोकोऽयमभिज्ञानशाकुन्तलमित्यस्मात् गृहीतः। अस्मिन् श्लोके महर्षिः कण्वः आश्रमस्थितान् सर्वान् वृक्षान् सम्बोधयति। कथयति च - हे आश्रमतरवः! शकुन्तला दिवसादौ प्रप्रथमं भवतः कृते जलसिञ्चति,जलपानं चकारयति स्म, ततः परमेव स्वयम् जलं पिबति स्मासा अलङ्कारप्रियं भूत्वाऽपि सा भवतः स्नेहकारणात् पत्रमपि न चिनोति। सा भवद्भ्यः कृते अत्यन्तं स्नेहं करोति स्म। यदा भवत्सु(तरुणाकृते) प्रथमं पुष्पाणि प्रादुर्भवन्ति ,प्रस्फुटयति स्म, तदा सा अतीव आनन्दिता भवति स्म। इदानीं सा स्वपतिगृहं गच्छति। अतः यूयं सर्वे मिलित्वा तस्यै गमनस्य अनुमतिं दत्त। श्लोके शकुन्तलायाः प्रकृतेः प्रति गाढः स्नेहः परिदृश्यते। वृक्षाणां प्रति वात्सल्यभावः तथा मानव-प्रकृतयोर्मध्ये मधुरः सम्बन्धः सुन्दररीत्या निरूपितः अस्ति।पुनः तत्राङ्के -

© 2026 अजय कुमार पधानः. This is an open-access article distributed under the terms of the Creative Commons Attribution 4.0 International License (CC BY NC ND).https://creativecommons.org/licenses/by/4.0/

अस्मान् साधु विचिन्त्य संयमधनानुच्चैः कुलं चात्मन-
स्त्वय्यस्याः कथमप्यबान्धवकृतां स्नेहप्रवृत्तिं च ताम् ।
सामान्यप्रतिपत्तिपूर्वकमियं दारेषु दृश्या त्वया

भाग्यायत्तमतःपरं न खलु तद्वाच्यं वधूबन्धुभिः(4 - 19)

अयं श्लोकः कन्याबन्धुभिः वरंप्रति(दुष्यन्तस्य कृते दत्तः सम्वादः) उक्तमुपदेशरूपः सन्देशः अस्ति। पिता कण्व कथयन्ति यत् वयं तु साधुपुरुषः, संयमरूपधनसम्पन्नं युक्तं, उच्चकुलोत्पन्नं च ज्ञात्वा अस्याः कन्यायाः हस्तं तुभ्यं प्रदत्तवन्तः। अस्याः कन्यायाः मनसि त्वयि यः स्नेहः, अनुरागः, विश्वासश्च उत्पन्नः, सः न तु बान्धवैः बलात् स्थापितः, अपितु स्वाभाविकतया एव विकसितः नकोऽपि अत्र मध्यस्ति असीत्। सा त्वां पतिरूपेण स्वीकृतवती तथा त्वयि पूर्णविश्वासं निवेशितवती। अतः हे वर(दुष्यन्तः)! त्वया अपि अस्याः प्रति समानभावेन,उचितव्यवहारपूर्वकं, प्रेम्णा, सौहार्देन, समेषां सम्मानपूर्वकं च आचरण करणीयम्। विवाहे केवलं सामाजिकसम्बन्धस्य स्थापना न भवति, परन्तु द्वयोः हृदययोः ऐक्यमपि भवति। तस्मात् पत्नीं प्रति सद्भावः, स्नेहः, संरक्षणम्, आदरश्च आवश्यकः। इयं कन्या अधुना तव दारेषु, अर्थात् तव गृहस्थजीवने, तव सहधर्मचारिणी रूपेण प्रविष्टा अस्ति। त्वं तस्याः सुखदुःखयोः सहभागी भूत्वा ताम् अनुरञ्जय, तस्याः मनोभावान् च अवगच्छ। यतः मनुष्यजीवने सर्वं भाग्याधीनं मन्यते, अतः अस्याः कन्यायाः भावी सुखदुःखे, सम्मानापमानयोः, जीवनस्य समृद्धौ वा क्लेशेषु वा, तश्छर्वं भाग्य अधीने अस्ति।वयं बान्धवाः अस्याः पालनपोषणं कृत्वा तव हस्ते समर्पितवन्तः। अतः इतः परं वधूबान्धवैः किमपि विशेषं वक्तव्यं नास्ति। अस्याः कल्याणं, संरक्षणं, सुखसमृद्धिश्च अधुना तव उत्तरदायित्वम् अस्ति। एष एव अस्य श्लोकस्य मुख्यः भावः यत् विवाहबन्धने परस्परप्रेम, विश्वासः, समानव्यवहारः, उत्तरदायित्वबोधश्च अत्यन्तम् आवश्यकाः भवन्ति इति। पुनः अङ्के -

शुश्रूषस्व गुरून् कुरु प्रियसखीवृत्तिं सपत्नीजने
भर्तुर्विप्रकृतापि रोषणतया मा स्म प्रतीपं गमः।
भूयिष्ठं भव दक्षिणा परिजने भाग्येष्वनुत्सेकिनी

यान्त्येवं गृहिणीपदं युवतयो वामाः कुलस्याधयः। (4 - 20)

अस्मिन् श्लोके महर्षिः कण्वः स्वपुत्रीवत् पालितां शकुन्तलां पतिगृहं प्रेषयन् आदर्शगृहिण्याः कर्तव्यं बोधयति। सः कण्व महर्षि कथयति हे पुत्रि! त्वं गुरुजनान् श्रद्धया, सदा सेवस्व। सपत्नीषु सखीवत् प्रेम्णा व्यवहारं,आचरणं च करिष्ये। यदि पतिः कदाचित् क्रोधात् कटुवचनं वदेत्, तथापि तस्य प्रति प्रतिकूलभावं मा कुरु। सेवकजनान् प्रति दयालु-उदारभावेन व्यवहर्तव्यम्। स्वस्य सौभाग्येन, रूपेण, धनेन वा कदापि गर्वं मा कुरु। विनयः, सहनशीलता, करुणा, नम्रता च स्त्रियाः श्रेष्ठाः गुणाः भवन्ति। एतेषां गुणानां पालनात् स्त्री गृहिणीपदस्य योग्यतां प्राप्नोति तथा सर्वेषां प्रियाभवति तथा कुलस्य यशः वर्धयति। या स्त्री एतान् सद्गुणान् आचरति, सा सर्वेषां प्रियाभवति तथा परिवारे सुख-शान्तिं स्थापयति। एते उपदेशाः केवलं शकुन्तलाकृते न, अपितु सर्वासां नववधूनां कृते अपि समानरूपेण उपयुक्ताः सन्ति। अयं श्लोकः भारतीयसंस्कृतेः पारिवारिकमूल्यानि, शिष्टाचारं, कर्तव्यपरायणतां, विनयं च सुन्दररीत्या प्रतिपादयति। अतः अयं शाश्वतः जीवनोपदेशः इति मन्यते। एवं रुपेण श्लोकचतुष्टयस्य महत्व प्रतिप्द्यते ।

सहायक ग्रन्थाः

1. हरेकृष्णशतपथी। अभिज्ञानशाकुन्तलम्। किताबमहल।
2. उमाशङ्करशर्मा ऋषि। संस्कृत साहित्यत्य का इतिहास। चौखम्बा भारती अकादमी।
3. Google.
4. Wikipedia.

Creative Commons (CC) License

This article is an open-access article distributed under the terms and conditions of the Creative Commons Attribution–Non-Commercial–No Derivatives 4.0 International (CC BY-NC-ND 4.0) license. This license permits sharing and redistribution of the article in any medium or format for non-commercial purposes only, provided that appropriate credit is given to the original author(s) and source. No modifications, adaptations, or derivative works are permitted under this license.

About the Author

अजयकुमारपधानः राष्ट्रियसंस्कृतविश्वविद्यालयस्य (NSU) साहित्यविभागे शोधच्छात्रः अस्ति। संस्कृतसाहित्ये, भारतीयज्ञानपरम्परायां, काव्यशास्त्रे तथा सांस्कृतिकाध्ययने तस्य विशेषरुचिः वर्तते। सः अनुसन्धानकार्येषु सक्रियः अस्ति तथा राष्ट्रिय-अन्तर्राष्ट्रीयशोधपत्रिकासु अनुसन्धानलेखनं, शैक्षिकचर्चासु सहभागित्वं च करोति।

© 2026 अजय कुमार पधानः. This is an open-access article distributed under the terms of the Creative Commons Attribution 4.0 International License (CC BY NC ND).https://creativecommons.org/licenses/by/4.0/